# आचार्यद्वितीयवर्षम्

# चतुर्थपत्रम् नव्यव्याकरणम्

## शैक्षिकनिष्पत्तिः

आचार्य द्वितीयवर्षे व्याकरण विषयाध्येतृणां छात्राणां कृते चतुर्थपत्र रूपेण नागेशभट्टविरचितः परमलुमञ्जूषानामको ग्रन्थो सत्रार्द्धद्वयेऽपि पाठ्यक्रमे निर्धारितो वर्तते। तत्र प्रथमसत्रार्द्धे आरम्भतः धात्वर्थनिर्णयं यावत् द्वितीयसत्रार्द्धे च निपातार्थनिरूपणतः समासावृत्त्यर्थनिरूपणं यावत् वर्तते। अस्य ग्रन्थस्याध्ययनेन छात्रो अधोलिखितान् विषयान् अवगच्छन्ति।

- नव्यन्यायस्य भाषाशैल्याः परिज्ञानम्।
- व्याकरणविषयकाणां दार्शनिकतत्वानां दर्शनेन दर्शनान्तरेण सह तुलनात्मकम् अध्ययनम्।
- शाब्दबोधपरिज्ञानम्, शाब्दबोधस्य करणं सहकारिकारणानां योग्यताऽऽकांक्षासत्तीनाम् विज्ञानम्।
- लक्षणा– व्यंजनापदार्थविज्ञानम्।
- धातोरर्थविज्ञानम्।
- तिङामर्थविज्ञानम्।
- व्याकरणशास्त्रे सहायिकानां सामान्यपरिभाषाणां विज्ञानम्।
- लिङ्गविशिष्टग्रहणविज्ञानम्।
- गतिकारकोपपदानां सुबुत्पत्तेः प्रागे व समासो भवतीत्यस्य विज्ञानम्।
- समासविधेरनित्यत्वविज्ञानम्।
- सन्निपातलक्षणपरिभाषाविज्ञानम्।
- शास्त्रशेषप्रकरणस्थ– अन्यप्रमुखपरिभाषाविज्ञानम्।